मध्या प्रवत्स्यत्पतिका यथा,—
"गन्तुं प्रिये ! वदति निःश्वसितं न दीर्घ-
मासीन्न वा नयनयोर्जलमाविरासीत् ।
आयुर्लिपिं पठितुमेणदृशः परन्तु
भालस्थलीं किमु करः समुपाजगाम ॥" २ ॥
प्रौढ़ा प्रवत्स्यत्पतिका यथा,—
"नायं मुञ्चति सुभ्रुवामपि तनुत्यागे वियोगज्वर-
स्तेनाहं विहिताञ्जलिर्यदुपते ! पृच्छामि सत्यं वद।
ताम्बूलं कुसुमं पटीरसदकं यद्दन्मुभिर्दीयते
तत् स्वादन्त परत्र वा किमु विषज्वालावली-
दुःसहम् ॥" ३ ॥
परकीया प्रवत्स्यत्पतिका यथा,—
"न्यस्तं पन्नगमह्निं पादयुगलं भक्तिविसक्ता गुरौ
त्यक्ता नीतिरकारि किं न भवतो चेतोमया
दुष्कृतम् ।
अङ्गानां प्रलयासना नयनयोः कोपक्रमो रौरवः
कुम्भीपाकपराभवश्च मनसो युक्तं त्वयि
प्रस्थिते ॥" ४ ॥
सामान्यप्रवत्स्यत्पतिका यथा,—
"सद्यः प्रदेहि वलयाय भवद्वियोग-
मासाद्य यास्यति बहिः सहसा यदेतत् ।
इत्थं निगद्य विगलन्नयनाम्बुधारा
वाराङ्गना प्रियतमं करयोर्बभार ॥" ५ ॥
इति रसमञ्जरी ॥

प्रवयणं, क्ली, (प्रवीयतेऽनेनेति । प्र + अज गतौ क्षेपणे च + ल्युट् । "वा यौ ।" २ । ४ । ५७ । इति वी । "लत्वच: ।" ८ । ४ । २९ । इति णत्वम् ।) प्रतोदः । इति हेमचन्द्रः । ४।५५७ ॥ (प्र + वय गतौ + भावे ल्युट् । प्रकर्षेण गमनम् । इति केचित् ॥)

प्रवयाः, [स्] त्रि, (प्रगतं वयो यस्य ।) वृद्धः । इत्यमरः । २ । ६ । ४२ ॥ (यथा, रघुः ।८।१८।
"नृपतिः प्रकृतीरवेक्षितुं
व्यवहारासनमाददे युवा ।
परिचेतुमुपांशुधारणां
कुशपूतं प्रवयास्तु विष्टरम् ॥"
पुराणः । इति निघण्टुः । ३ । २७ ॥ यथा, ऋग्वेदे । २ । १७ । ४ ।
"अधा यो विश्वा भुवनाभि मज्मनेशानकृत्-
प्रवया अभ्यवर्धत ॥")

प्रवरं, क्ली, (प्रव्रियते इति । प्र + वृ + अप् ।) अगुरु । इति भावप्रकाशः ॥ गोत्रम् । श्रेष्ठे, त्रि । इति मेदिनी । रे, १७६ ॥ (यथा, मनुः । १० । २७ ।
"एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु ।
मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥")

प्रवरः, पुं, (प्र + वृ + अप् ।) सन्ततिः । इति मेदिनी । रे, १७६ ॥ गोत्रप्रवर्त्तकमुनिव्यावर्त्तको मुनिगणः । तथा च यमदग्निगोत्रस्य प्रवराः यमदग्न्यौर्व्ववशिष्ठाः । भरद्वाजगोत्रस्य भरद्वाजाङ्गिरसबार्हस्पत्याः । विश्वामित्रगोत्रस्य विश्वामित्रमरीचिकौशिकाः । अत्रिगोत्रस्य अत्र्यात्रेयशातातपाः । गौतमगोत्रस्य गौतमवशिष्ठबार्हस्पत्याः । वशिष्ठगोत्रस्य वशिष्ठः । केषाञ्चित् वशिष्ठात्रिसाङ्कृतयः । काश्यपगोत्रस्य काश्यपाप्सारनैध्रुवाः । अगस्त्यगोत्रस्य अगस्तिदधीचिजैमिनयः । सौकालिनगोत्रस्य सौकालिनाङ्गिरसबार्हस्पत्याप्सारनैध्रुवाः । मौद्गल्यगोत्रस्य और्व्वच्यवनभार्गवजामदग्न्याप्नुवत: । पराशरगोत्रस्य पराशरशक्तिवशिष्ठाः । वृहस्पतिगोत्रस्य वृहस्पतिकपिलपार्व्वणाः । कात्यायनगोत्रस्य अश्वत्थदेवलदेवराजाः । विष्णुगोत्रस्य विष्णुवृद्धिकौरवाः । कौशिकगोत्रस्य कौशिकात्रिजमदग्नयः । कात्यायनगोत्रस्य अत्रिभृगुवशिष्ठाः । आत्रेयगोत्रस्य आत्रेयशातातपसांख्याः । काश्यगोत्रस्य काश्याश्वत्थदेवलाः । कृष्णात्रेयगोत्रस्य कृष्णात्रेयात्रेयावासाः । साङ्कृतिगोत्रस्य अयाहाराचिसाङ्कृतयः । कौण्डिल्यगोत्रस्य कौण्डिल्यस्तिमिककौत्साः । गार्गगोत्रस्य गार्ग्यकौस्तुभमाण्डव्याः । आङ्गिरसगोत्रस्य आङ्गिरसवशिष्ठबार्हस्पत्याः । अनावृकाक्षभोत्रस्य गार्ग्यगौतमवशिष्ठाः । अव्ययगोत्रस्य अव्ययवसिसारस्वताः । जैमिनिगोत्रस्य जैमिन्युतथ्यसांकृतयः । वृद्धिगोत्रस्य कुरुवृद्धाङ्गिरोबार्हस्पत्याः । शाण्डिल्यगोत्रस्य शाण्डिल्यासितदेवलाः । वात्स्यगोत्रसावर्णगोत्रयोः और्व्वच्यवनभार्गवजामदग्न्याप्नुवत: । आलम्बायनगोत्रस्य आलम्बायनशालङ्कायनशाकटायनाः । वैयाघ्रपद्यगोत्रस्य साङ्कृतिः । घृतकौशिकगोत्रस्य कुशिककौशिकघृतकौशिकाः । केषाञ्चित् कुशिककौशिकबन्धुलाः । शक्तिगोत्रस्य शक्तिपराशरवशिष्ठाः । काण्वायनगोत्रस्य काण्वायनाङ्गिरसबार्हस्पत्यभरद्वाजाजमीढाः । वासुकिगोत्रस्य अच्योश्वानन्तवासुकयः । गौतमगोत्रस्य गौतमाप्सराङ्गिरसबार्हस्पत्यनैध्रुवाः । केषाञ्चित् गौतमाङ्गिरसावासाः । शुनकगोत्रस्य शुनकशौनकगृत्समदाः । सौपायनगोत्रस्य प्रवराः और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः । इति धनञ्जयकृतधर्म्मप्रदीपे गोत्रप्रवरविवेकः ॥

प्रवर्गः, पुं (प्रवृज्यते निःक्षिप्यते हविरादिकमस्मिन्निति । प्र + वृज + अधिकरणे घञ् ।) होमाग्निः । इति हेमचन्द्रः ।४।५०० ॥ (यथा, हरिवंशे । ४१ । ३४ ।
"दक्षिणाहृदयो योगी महासत्रमयो महान् ।
उपाकर्म्मोष्ठरुचकः प्रवर्गावर्त्तभूषणः ॥"
प्रवर्ग्य इति पाठोऽपि दृश्यते ॥)

प्रवर्त्तकः, त्रि, (प्रवर्त्तयतीति । प्र + वृत् + णिच् + ण्वुल् ।) प्रवर्त्तनकारी । प्रवृत्तिजनकः । यथा,
"प्रवर्त्तकं वाक्यमुवाच चोदनां
निवर्त्तकं नैवमुवाच भाष्यकृत् ।
ततश्च विद्धो नहि चोदनास्ति सा
प्रवर्त्तिका या न भवेदिति स्थितिः ॥"
इति संक्षेपशारीरकम् ॥
(यथा च देवीभागवते । १ । १४ । ४२ ।
"प्रथमं पठिता वेदा मया विस्तारिताश्च ते ।
हिंसामयास्ते पठिताः कर्म्ममार्गप्रवर्त्तकाः ॥"
प्रयोजकः । यथा, भागवते । ६ । १७ । ४ ।
"धन्वन्तरिर्दीर्घतमश्च आयुर्वेदप्रवर्त्तकः ।
यज्ञभुग् वासुदेवांशः स्मृतिमात्रार्त्तिनाशनः ॥")

प्रवर्त्तनं, क्ली, (प्र + वृत् + णिच् + ल्युट् ।) प्रवृत्तिः । यथा,—
"तेऽन्येऽर्वाञ्चं समश्नन्ति परोत्सर्गेषु भुञ्जते ।
इतरार्थेऽपि येषां कवीनां स्यात् प्रवर्त्तनम् ॥"
इति काव्यप्रकाशः ॥
आरम्भः । यथा,—
"मृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे ।
राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम् ॥"
इति मिताक्षरा ॥

प्रवर्त्तना, स्त्री, (प्र + वृत् + णिच् + युच् ।) प्रवृत्ति प्रेरणम् । यथा, नैषधे । २ । ६१ ।
"अथवा भवतः प्रवर्त्तना
न कथं पिष्टमियं पिनष्टि न ।
स्वत एव सतां परार्थता
ग्रहणानां हि यथा यथार्थता ॥"

प्रवर्त्तितः, त्रि, (प्र + वृत् + णिच् + क्तः ।) जातः । यथा, रघुवंशे । ५ । ३७ ।
"रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्वात् बिभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥"

प्रवर्द्धनं, क्ली, प्रपूर्व्ववृधधातोर्भावे अनट् (ल्युट् ।) विवर्द्धनम् ।कर्त्तरि (ल्यु) अनप्रत्यये, वृद्धिकारके, त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"हरमांसं समधुरं कषायानुरसं स्मृतम् ।
वातपित्तोपशमनं गुरु शुक्रप्रवर्द्धनम् ॥")

प्रवर्हः, त्रि, (प्रवर्हति प्रवर्हते इति । प्र + वृह + अच् ।) प्रधानम् । श्रेष्ठः । इत्यमरः ।३।१।५७॥

प्रवलाकी, पुं, भुजङ्गः । चित्रमेखलकः । इति विश्वः ॥

प्रवहः, पुं, (प्र + वह् + भावे + अच् ।) गृहनगरादेर्बहिर्गमनम् । इत्यमरः । ३ । १ । १८॥ (प्रवहतीति । प्र + वह् + अच् ।) वायुः । इति हेमचन्द्रः ॥ सप्तवायुन्तर्गतद्वितीयवायुः । स तु आवहवायोरूर्द्धस्थितः । इति सिद्धान्तशिरोमणिः ॥
"यस्माज्ज्योतींषि वहति प्रवहस्तेन स स्मृतः ॥"
इति विष्णुपुराणे २ अंशे १२ अध्यायः ॥
अस्य टीका । "यस्माज्ज्योतींषि प्रकर्षेण वहति तेन स वायुः प्रवहः स्मृतः प्रवहस्यैव भेदाः सर्व्वे वायुस्कन्धाः ॥" (मेघविशेषः । यथा, स्कान्दे सह्याद्रिखण्डे । ५ । ६ ।
"आवहः प्रवहश्चैव उद्वहाश्च महांस्तथा ।
परीवहः प्रवहश्च विवहश्च परावहः ॥")

प्रवहणं, क्ली, (प्रोह्यते अनेनेति । प्र + वह + करणे ल्युट् ।) कर्णीरथः । स्त्रीरत्नवहनार्थ-